SADANUṢṬHĀNADARPAṆAVIṢODHANAM

NYPL R
3 3433
87-1611 NXO*

ESEARCH LIBRARIES
3 05862090 1

New York
Public Library

Provided by
The Library of Congress
Special Foreign Currency Program.

I–San
78–908684

Veeraraghavacharya, T E 1900–
Sadanuṣṭhānadarpaṇaviśodhanam / lekhakaḥ Tirumalai Ĭccambāḍi Vīrarāghavācāryasvāmī. — Śrīraṅgam : Śrīvāṇīvilāsamudraṇālayaḥ, [1978]
20 p. ; 26 cm.
Cover title.
In Sanskrit.
(Critical study of the Sadanuṣṭhānadarpaṇa of Varadācāryasvāmin, a treatise on ritualistic considerations in the Viśiṣṭadvaita school of Indic philosophy)

18Oc78 TOUR CB unb. BKB K I–San–3154

*OKN
87-1611

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

॥ श्रीमते निगमान्तमहादेशिकाय नमः ॥

॥ श्रीरङ्गनायिकासमेत श्रीरङ्गनाथपरब्रह्मणे नमः ॥

॥सदनुष्ठानदर्पणविशोधनम्॥

लेखकः

श्रीमद्वेदमार्गप्रतिष्ठापनाचार्य उभयवेदान्ताचार्य भगवद्रामानुज सिद्धान्त निर्धारण सार्वभौम न्यायवेदान्तकेसरि तर्करत्न देशिकदर्शन रत्नाकर मधुरान्तक तिरुमले ईच्चम्बाडि

वीरराघवाचार्यस्वामी

श्रीरङ्गम्

पिङ्गळवर्ष मार्गशीर्षमासः

श्रीवाणीविलासमुद्रणालयः, श्रीरङ्गम् ।

॥ श्रीमते रामानुजाय नमः ॥

॥ सदनुष्ठानदर्पणविशोधनम् ॥

पद्माकान्तपदप्रपन्नपरिषत्कूटस्थसूरीश्वर
श्रीपादप्रवणात्मभावभगवद्रामानुजैकाश्रयम् ।
श्रीमद्वेदवतंसदेशिकमणिं तत्पादचूडान्वितान्
धन्यान् श्रीनिधियोगिपुङ्गवमुखान् सेवेय चान्यान् गुरून् ॥

मधुरान्तकवासिष्ठ वीरराघवसूरिणा ।
शोध्यते शुद्धसत्त्वार्यसदनुष्ठानदर्पणम् ॥

अवतरणिका

श्रीमद्वालव्याघ्रपुराभिजन श्रीशुद्धसत्ववरदाचार्यस्वामिभिरनुगृहीततया प्रकाशितं सदनुष्ठानदर्पणं नाम निबन्धनं प्रपन्नपरमैकान्तिनां नित्यनैमित्तिककर्मानुष्ठानावश्यकतां प्रकाशयत् बहुप्रमाणोदाहरणपूर्वकं स्वाभिमतार्थव्यवस्थापकं प्रमाणशरणानां सबहुमानावलोकनपात्रं भवति ॥

विशिष्य चैते शठकोप-रामानुज-वेदान्तदेशिकानां त्रयाणां ब्रह्माण्डपुराण-श्रीपाद्मपुराण-विष्णुरहस्यादिषु, पाषण्डच्छेदायावतीर्णताम् प्रसिद्धां सप्रमाणं प्रदर्शयन्तः स्वस्य तेषु परममक्तिमप्याविष्कुर्वन्तः सांप्रदायिकानां समेषामप्येतेषु त्रिषु विशेषभक्तेरविशेषं कर्तव्यतां कान्तासम्मितोपदेशेन व्यञ्जयन्तीति वक्तृवैलक्षण्यपरिकर्मितमिदं दर्पणम्। अथापि निश्श्वासोपहतदर्पणस्येव मलिनिमाऽत्र तत्र तत्र दृश्यते । अतस्तत्परिशोधनमवश्यकर्तव्यं भवति । दर्पणमालिन्ये हि प्रतिफलनान्यपि मलिनानीव भासेरन् ॥

मालिन्यं च वैधदेव – कैवल्यादिषु विषयेषु दर्पणस्यास्य स्फुटमुपलभामहे । तदिदमनुपदमेव व्यक्तीभविष्यति । विशोधयिष्यते च । प्रथममूर्ध्वपुण्ड्रधारणविषयकं प्रतिफलनं पृष्ठं विशोध्यते । सपादोर्ध्वपुण्ड्रधारणविषये श्रीमन्निगमान्तगुरोरुपदेशानुष्ठाने प्रमाणयन्तः प्रबन्धार एते तयोरादरणीयत्वे प्रमाणानीमानि प्रदर्शयन्तो बहूपकुर्वन्ति । यथा —

ब्रह्माण्डपुराणे अहीन्द्रपुरमाहात्म्ये — तृतीयाध्याये 'अश्वत्थमूले घण्टावत
मुनिस्तपस्यतीति' अर्थानुवादोयम् । कलौ युगे महानेक ऋषिर्घण्टांशको हरेः । तपः कु
गिरौ तस्मिन् सिद्धि प्राप्तो भविष्यति । तरोरश्वत्थसंज्ञस्य निकटे तत्र पर्वते । इ
ब्रह्मनारदसंवादे पुराणपाठः । श्रीपाद्मपुराणे उत्तरखण्डे उमामहेश्वरसंवादे एकचत्वारिंशाध्याये

'तस्मिन् कलौ युगे देवि रक्षणार्थं जनस्य वै ।
लक्ष्मीपतिर्जगन्नाथः कृपया सर्वजन्तुषु ।
स्वांशेनैव त्रिधा भूत्वा कलिदोषं निवारयेत् ॥

एको रामानुजो ज्ञेयश्शेषांशस्सर्वशास्त्रवित् ।
शठकोप इति ख्यातो द्वितीयः कालपापहृत् ॥

वेङ्कटेशांशको ह्येकः तृतीयः कमलानने ।
एवं बहुविधाचार्याः पाषण्डच्छेदिनस्स्मृताः' ॥

इति । विष्णुरहस्ये – भक्तस्वरूपकथनप्रकरणे – घण्टात्मानं समुज्जातं निगमान्तगुरुं बुध
इत्यादिप्रमाणरीत्या घण्टावतारभूत श्रीमन्निगमान्तगुर्वर्चादिव्यमङ्गलविग्रहादौ सश्रीचूर्णं सपादो
पुण्ड्रं अद्यापि समुज्ज्वलतीति । अत्रादिपदेन श्रीवेङ्कटाचलमाहात्म्यादिकं विवक्षितम् 'कृष्णा
विप्रवेदान्तदेशिकत्वप्रदाय नमः' इत्यष्टोत्तरशतनामसु प्रसिद्धमिदम् ॥

तदेवं सच्चरित्ररक्षाग्रन्थमुखेन स्वानुष्ठानेन चोर्ध्वपुण्ड्रं सपादं सश्रीचूर्णं च श्रीवैष्ण
र्धार्यमिति निर्धारयतां देशिकानां तदनुयायिनां च शुद्धसत्त्वस्वामिनां पुण्ड्रधारणविधिविशे
क्रियते शेष्यांशशोधनेन ॥

केशवपुण्ड्रप्रमाणपरिशोधनम्

अत्र केशवपुण्ड्रविषये स्वामिनः — 'नासादौ द्वयङ्गुलं पादमि'ति प्रमाणम
पन्नम् । अत्र — 'आदि' पदं मूलवाचकम् — 'नासिकामूलमारभ्य' इत्युक्तेः । नासि
मूलञ्च — पाद्मसंहितायां नासिकायास्त्वधो भागो नासामूलं प्रचक्षते' इति निर्णीत
(पु-१३२) योगयाज्ञवल्क्यस्मृतौ पाद्मसंहितायां च — भ्रूमध्यादधस्तात् चक्षुर्मध्यं, त
दधस्तात् नासिकामूलमिति प्रदर्शितम् । कृष्णतारकाद्वयमध्यव्यापि तिर्यक् सूत्रं नासान
यत्र पतति तदेव स्थानं चक्षुर्मध्यं नाम । तस्मादधस्तात् नासिकामूलम्; नोपरिष्टात्' इ
शिल्पिभिर्निर्णीतत्वेन ललाटे शिष्टाः प्रपन्नाः नासामूलादिद्वयंगुलपरिमितं ईषद्विकसितप

कारपादं विलिख्य नासानालस्य तनुत्वेन द्वयङ्गुलपरिमितान्तरालं विहाय पद्माकारपादोर्ध्व-प्रान्तोभयपार्श्वयोः एकाङ्गुल परिमितोर्ध्वाग्र हरिपादसमानाकारशाखाद्वयं परिकल्प्य तन्मध्ये श्रीचूर्णरेखां परिकल्प्य ऊर्ध्वपुण्ड्रं धारयन्ति । सपादमूर्ध्वपुण्ड्रं तु द्विषट्स्थानेषु विन्यसेत् इति बृहन्नारदीयादिवचनैः कुक्ष्यादित्रिकान्तेषु एकादशस्थानेषु तथैव प्राप्तम्' इत्यादि प्रतिपादयन्ति । (पु-१४१-१४२) ॥

अत्र विमृश्यते -- भ्रूमध्यादधस्तात् चक्षुर्मध्यम् । चक्षुर्मध्यादधस्तात् नासिका । नासिकाया अधस्तात् नासामूलम् नोपरिष्टात् । नासादिशब्दप्रतिपाद्येऽस्मिन् द्वयङ्गुलं पादम् इति स्थितम् । सति चैवं भ्रूमध्यापेक्षया पर्वत्रयव्यवधानतुङ्गां शेषत्वकाष्ठां वहति नासिकामूले परिसमाप्तस्य द्वयङ्गुलप्रमाणस्य 'नोपरिष्टात्' इति निषिद्धे स्वाश्रयानाश्रये नासिकायां सम्बन्धः कथम्? कथन्तरां तदुपरिष्टात् स्थितं चक्षुर्मध्यमधिष्ठातुं शक्तिः? कथन्तमाम् तदुपरि-भ्रूमध्यादधस्तात् सम्बद्धुं योग्यतापि । पद्माकारपादोर्ध्वप्रान्तोभयपार्श्वस्य हरिपादद्वयपीठरूपं नासिकामूलस्थं द्वयङ्गुलरेखाद्वयमिति कथमुपपद्यताम्?। भ्रूमध्यपर्यन्तं नासिकामूलं यदि स्यात् तदा सम्भाव्येतापि पीठत्वकल्पना। 'नोपरिष्टात्' इति दण्डाघातेन निवारितं नासिकामूलं स्वाश्रयद्वयङ्गुलपादं स्वानाश्रय हरिपादयोः पीठीकरणायालं वा इति स्वयमेव विवेचयन्तु विपश्चितः ॥

यत्तु 'कुण्डलीकृतसर्पस्थहरिपादाकृतिं न्यसेत्' कुण्डलीकृतसर्पस्थेति हरिपादविशे-षणम् । कुण्डलीकृतसर्पोहि सर्पशिरसिस्थितभगवत्पादस्यासनस्थानीयः अनेन हरिपाददृष्टान्तितस्य पुण्ड्रस्य पादे दृष्टान्तो भवतीति दर्पणोक्तम् ॥

अत्रेदं विमृश्यते । सर्पः पृदाकुर्भुजगः ... कुण्डली गूढपात् इत्यादिकोशात् सर्पस्यैव कुण्डलि स्वभावत्वेन कुण्डलीकृतसर्पेति क्विप्रत्ययान्तविशेषणं किमर्थम् । 'कुण्डलिस्थ' इत्येतावता विवक्षित सिद्धौ कुण्डलीकृतसर्पेति विशेषणं व्यर्थम् -- स्मृतिसिद्धे न चोद्यमिति चेत् विवक्षित सप्रयोजनार्थान्तरसम्भवे निष्प्रयोजनार्थवर्णनस्यासङ्गतेः । अकुण्डलीकृतेऽपि सर्पे शिरसि सपीठहरिपाददर्शनेन कुण्डलीकृतेति विशेषणस्य वैयर्थ्यात् । आदिशेषस्य हरिपादोत्र दृष्टान्त इति चेत् सव्यं पादं प्रसार्य दक्षिणं कुञ्चयित्वाच तत्रावस्थानात् तथात्वस्याविवक्षितत्वात् ॥

कोर्थस्तर्हि विवक्षित इहेति चेत् कुण्डलीकृतं सर्पस्थं हरिपादद्वयं-यत् तदाकृति इत्यर्थः । सर्पशिरसि फणायां यौ हरिपादौ रेखारूपौ दृश्येते तत् हरिपादद्वयं अधः पादद्वया-धारभूत कुण्डलरेखाविशिष्टमेव । कुण्डलरेखावत्कृतं कुण्डलीकृतं सर्पस्थहरिपादद्वयं यत् तदाकृति

इति भावः। अत्र "இருளிரியச்சுடர்மணிகளிமைக்கும் நெற்றி இனத்துத்தியணி பணமாயிரங்களார்ந்த அரவரசப் பெரும்சோதி அநந்தன் इत्यत्र श्रीकृष्णपा हरिपादद्वयाकृतित्व शेषफणास्थरेखाद्वयस्योक्तम्। देशिकैरपि पादुकासहस्रे सन्निवेशपद्धतौ

"(இனத்துத்தியணிபணமாயிரங்களார்ந்த) இ ன மா ன து த் தி அதாவது-இரண்டாய்ச்சேர்ந்த திருவடிநிலை என்று சொல்லுகிறவற்ை யுடைத்தான பணங்களாயிரத்தையும் பூர்ணமாகவுடையவனுய் அநந்த னென்னும்" इति

"அணிமணியின் துத்திசேர்நாகத்தின் மேல்
துயில்வான்-பணங்களிலே அழகியமணிகளை
யுடைத்தாய் திருவடிநிலைகள் போலேயிருக்கிற
திருமண்சேர்ந்த திருவநந்தாழ்வான் மேலே
(இ- 2-96-அரும் பதம்)

तव रङ्गनरेन्द्रपादयक्षे प्रकृतिस्सन्नपि भक्तिपारतन्त्र्यात्।
भवतीं वहतीव पन्नगेन्द्रः प्रथितस्वस्तिकलक्षणैश्शिरोभिः॥

परस्य पुंसः पदसन्निवेशान् प्रयुञ्जते भावितपञ्चरात्राः।
अधप्रतीपानपदिश्य पुण्ड्रान् अङ्गेषु रङ्गेश्वरदुपादुके त्वाम्॥ (७८३-७८४)

वधूनां मौलावाभरणानि मङ्गलहेमसूत्राणि च शेषफणापुण्ड्राकारमुद्रितान्येव धारयन्ति सन्तः इति चोपरि समनुगृहीतम्। तथैव व्याख्यातश्च गुरोः (नम्बिळ्ळै) प्रधानान्तरङ्गशिष्याणां भारद्वाजमाधवगुरूणां वंश्यैः श्रीनिवासमूर्तिभिः। अतः कुण्डलीकृतं सर्पस्थं यत् हरिपादद्वयं तदाकृतीति स्वरसार्थः। तदवतारभूतैर्भगवद्रामानुजमुनिभिः तथा-वेनाभिमतैः वरवरमुनिभिश्च दृशं शेषशिरस्थरेखाद्वयाकारपुण्ड्रमेव हि धृतं भवेत्। अत एतादृशपुण्ड्रधारणमेवाचार्यपरंपराप्राप्तम्॥

यत्तु नासादौ द्वयङ्गुलं पादमिति स्मृतिसिद्धम्। अत्र सप्तमीप्रतिपन्नं आधेयत्वं पर्याप्तिरूपम्। स्ववाचकसप्तमीप्रकृत्यर्थभूतं यत् नासामूलं, तन्निरूपितपर्याप्तिसंबन्धावच्छिन्नवृत्तित्वमात्ररूपम्। अतो नासिकामूलं विहायापि द्वयङ्गुलपरिमाणं रेखाद्वयं स्वाश्रयनासिकामूलोपरिस्थितां नासिकां, तदुपरिस्थितं चक्षुर्मध्यं तदुपरितनं भ्रुवोरधस्तात् भागश्चातिक्रम्य तदुपरिस्थितयोः हरिपादयोः कथं पीठीभवतु?॥

किञ्च ललाटे चतुरंगुलं पादमूर्ध्वाग्रम् । एकाङ्गुलप्रमाणं पार्श्वे मध्ये त्र्यङ्गुलं द्व्यङ्गुलं वा छिद्रे विस्तीर्णम् । इत्यादिव्यवस्थापि भज्येत । नासादौ इत्यत्रैव सप्तम्याः 'ललाटे' 'मध्ये' इत्येवं श्रुतत्वात् । चतुरङ्गुलरेखायाः स्वाश्रयललाटानतिक्रमणवत्, मध्ये च्छिद्रत्वस्य च स्वानधिकरणानधिकरणकत्ववत्, नासिकामूलस्थ द्व्यङ्गुलरेखाया अपि स्वाश्रयैकान्त्यस्य वाच्यत्वात् ॥

अपि च भ्रुवोरधोधो भागादप्यधस्स्थितं नासिकामूलं द्व्यङ्गुलपरिमाणरेखाश्रयश्चेत् 'नासाग्रे' इति वचनान्तरानुरोधेनाग्रभागस्यापि द्व्यङ्गुलरेखावत्त्वावश्यकत्वात् मूलोपरि नासिकाया अपि तुल्यशीलत्वात् षडङ्गुलत्वादिकं नासायास्वीकार्यं स्यात् ॥

नासिकात्वस्य स्वनालवत्पार्श्वद्वयपर्याप्तत्ववत् मूलत्वस्यापि स्वाश्रयपार्श्वद्वयादिपर्याप्ततया द्व्यङ्गुलरेखाया अपि ऊर्ध्वाधरीभूतायाः नासानालमात्रवृत्तितायाः स्वेच्छया कल्पनाऽसम्भवात् नासामूले पार्श्वद्वयान्तर्भावेन मूलेऽस्थात्। नासिकामूलस्थत्वं द्व्यङ्गुलरेखाद्वयस्यानुपपन्नमिति प्रागदर्शि। नासिकाया अष्टाङ्गुलत्वादिप्रसङ्गात् । नासामूलस्य—भ्रुवोरधः यत् चक्षुर्मध्यं तदधो या नासिका तदधस्स्थत्वेन दर्पणकण्ठोक्तस्य स्वनिष्ठरेखाद्वयस्य स्वव्यवहितपूर्ववृत्तिललाटस्थ रेखाद्वयाधारत्वं असम्भावितमिति च प्रतिपादितम् । अतो नासिकामूले पुण्ड्रपीठमिति वादिभिः निराधारं हरिपाददद्वयमेव धार्यमित्यापतितम् ॥

तथा हि भ्रुवोरधस्तात् संबध्य हि हरिपादधारणं कार्यम् नासामूलस्य तत्सम्बन्धगन्धस्याप्यभावात् तद्गतरेखायाः हरिपाददद्वयाकाररेखापीठत्वं नैव सम्भवति। तदेवं पीठच्युतं हरिपाददद्वयम् ॥

ननु स्वाश्रयाधोधःपरम्पराघटिताधारतासम्बन्धेन हरिपाददद्वयाकाररेखयोः नासामूलरेखानिष्ठत्वेन पीठत्वमाधारतापरपर्यायमुपपद्यतामिति चेन्न । परम्पराया वृत्त्यनियामकत्वेन तदनुपपत्तेः । अन्यथा भूतलं घटवदितिवत् घटो भूतलवान् इति प्रयोगापत्तेः। एतेन तदाधारत्वं नाम—आधेयतासम्बन्धेन तत्सम्बन्धित्वमेव—न तु तदाधारत्वं मुख्यम् अतः प्रकृते हरि पाददद्वयेन परम्परासंबन्ध एव पीठत्वमिति चोद्यमपि परिहृतम् ॥

नासामूलोपरि भ्रुवोरधस्तात् विद्यमानं भागत्रयं प्रत्येकं द्व्यङ्गुलं सपुण्ड्रं चेत् चतुरङ्गुलोर्ध्वपुण्ड्रस्य भ्रुवोरधस्तादेव परिसमाप्ततया ललाटस्य पुण्ड्रशून्यत्वापत्तिः । अर्धं दानववैरिणा गिरिजयाप्यर्धं शिवस्याऽहृतम्' इति न्यायात्। नासामूले द्व्यङ्गुलं तदुपरि

भ्रुवोरधस्तात् द्व्यङ्गुलमिति सिद्धेः, चतुरंगुलपुण्ड्रविधानं ललाटे न स्यात्। पूर्वोपदर्शित-भागत्रयमेकैकांगुलञ्चेत् त्र्यंगुलस्य भ्रुवोरधः समाप्ततया ललाटे एकांगुलमात्रकं स्यादूर्ध्वपुण्ड्रम् ॥

अपि च स्थानानि द्वादशेत्यपि निरापपदं भवेत्। यत्तु 'व्यासस्मृत्युत्तरखण्डे – अम्भोजमुकुलाकारं पादं द्व्यंगुलसम्मितम्। नासिकादि भ्रुवोर्मध्यपर्यन्तं परिकल्पयेत्' (पु १४२.) इति। तदपि दर्पणपक्षे दुरुपपादम् मुकुलवत् सूक्ष्माग्रस्य पादद्वयमध्यगत त्र्यंगुलशून्यभागान्त राळ विश्रान्तस्य स्वव्यवहितदक्षिणोत्तरपादद्वयपीठत्वासम्भवात्। शाखाचन्द्रन्यायेनोपलक्षण स्यादिति चेन्न। पद्ममुकुलाकारस्य पादद्वयसमाध प्रदेशवर्तित्वाभावात् उपलक्षणविधयापि पीठत्वं नोपपद्यते ॥

अथ यदि मतं मुकुलाकारमिति विकसिताकारपरं स च विकासः पादद्वयव्यापिपीठत्व परिकल्पयितुमलमिति, तदपि न मुकुलशब्दस्य विकसितार्थकताया असम्भवात्। किं कुर्मः पाद्मसंहितायां दशमेध्याये – 'मध्ये कर्णिकया युक्तं किञ्चित् फुल्लाम्बुजाकृति 'इत्युक्तम्' तदनुरोधेन मुकुलाकारत्वं फुल्लाम्बुजाकारत्वञ्च स्वीकर्तव्यं नासिकामूलपुण्ड्रस्येति चेत्। मिथो विरोधात्। मुकुलत्वं हि अग्रदलानां मिथस्संयोगस्सुदृढः। फुल्लत्वञ्च तेषां विभागः। एकाव-च्छेदेनैकदा एकस्य नहि तौ सम्भवतः। एवमादिपरस्सहस्र दोषदुष्टं दर्पणाभिमतनासामूलस्य द्व्यङ्गलोर्ध्वाधोरेखावत्वमिति ॥

प्रामाणिकार्थ वर्णनम्

ननु अष्टादशलिङ्गाणीव प्रमाणानि प्रदर्शितानि; तेषां का गतिरिति चेत्, सुगतिरेव। पश्यन्तूदाहृतप्रमाणपुञ्जैकरस्यं महान्तः। प्रथमनिर्वाह एवम् – नासिकामूलमारभ्य इत्यत्र 'मूल'शब्दः समीपदेशपरः 'मूलमन्तिकपुञ्जयोः' इति कोशात्। स च समीपदेशः ऊर्ध्वभागः। नासादौ द्व्यंगुलं पादमित्यत्रापि नासायाः आदौ ऊर्ध्वभागे इत्यर्थः। वचनद्वयस्थयोः आदिशब्द मूलशब्दयोः एकार्थतैवं सिध्यति। नारदीये द्वादशपुण्ड्रस्थानानि प्रस्तुत्य – नासिकामूलमारभ्य ललाटे प्रथमं न्यसेत्। द्वितीयमुदरे नाभेरूर्ध्वं हृदि ततः परम्। वक्षोन्ते तत्परं पश्चात् कुक्षौ इत्यादि। अत्र वक्षोन्ते – वक्षसः उपरि इत्यर्थः स च कण्ठदेशः। (पु १३७.) तद्वदिहापि उपरिदेश एवार्थः। स च भ्रूमध्याधोदेशः। तत्र द्व्यङ्गुलं विस्तृतमिति विवक्षितमिह। एवं सति अधोभागस्य पीठत्वं सूपपन्नम्। ऊर्ध्वाधोभागरूपत्वे न कथञ्चिदपि पीठत्वसिद्धिरित्युपादर्शि ॥

पक्षान्तरन्तु नासादौ इति नासिकामूलमारभ्य इति च मर्यादापरम्। नाभिविधिपरम्। तेन सहेत्यभिविधिः। तेन विनेति मर्यादा। नासिकामूलं विहायेत्यर्थः। आङ्मर्यादायाम्। नासादौ इति सप्तमी उपरिभागपरा – तदुक्तं ज्योतिरधिकरणश्रुतप्रकाशिकायाम्–उपदेशभेदादिति सूत्रभाष्यव्याख्यायां त्रिपादस्यामृतं दिवि इति दिवोधिकरणत्वेन निर्देशात् दिवः पर इत्यवधित्वेन निर्देशात् उपदेशस्य भिन्नरूपत्वादिति चेत्, वृक्षाग्रे श्येनः वृक्षाग्रात् परतश्श्येनः इतिवत् उभयस्मिन्नप्युपदेशे नार्थभेदः; इत्यर्थकं भाष्यमुपादाय 'सप्तमी अन्तर्बहिरधरोर्ध्वभागस्थितिसाधारणी; पञ्चमी तूपरिस्थित्यसाधारणी; अत उभाभ्यां स्थानविशेषादुपरि स्थितिरेव विवक्षिता' इति। अत्रापि नासायाः अग्रं तस्मिन् इति विग्रहः। नासापेक्षया अग्रे–ऊर्ध्वभागे इत्यर्थात् भ्रूमध्यासन्नाधोभागे इत्येवं विवक्षितम्। अस्मिन् पक्षेपि पूर्वोदाहृत याज्ञवल्क्यस्मृत्याद्यविरोधः। आरभ्य नासिकामूलमित्यस्य नासिकामूलं विहाय तत्पूर्वभागविवक्षणात् शेषफणास्थ सपीठपादद्वयाकृतिसिद्धिः॥

நெற்றியுள் நின்றெண்ணியாளும் நிறைமலர் பாதங்கள் சூடி இति शठकोपमुनेर्गाथायां உள் நின்று इति - ललाटेतरदेशावृत्ती इत्यर्थः। நெற்றியில் நின்று इति सप्तमीनिर्देशे पूर्वोदाहृत श्रुतप्रकाशिकारीत्या अधोभागस्यापि प्रतीतिस्स्यात् உள்நின்று इति ललाटमात्रघटकत्वसिद्धयर्थमिति तदैकार्थ्यमपि॥

सपादोर्ध्वपुण्ड्रधारणे प्रमाणं – इत्युपक्रम्य स्वामिनो लिखन्ति – बृहत्सेनसंहितायां दिलीपनारदसंवादे,

ज्योतिष्टोमादियज्ञानां कर्तारस्तीर्थमज्जकाः।
सर्वकर्मधृतास्ते हि सर्वेषामपि पावनाः॥

नासाग्र पादसंयुक्त पुण्ड्रयुक्तास्तथैव हि।
सदा ते योग्यवर्याश्च मम भक्तास्तथैव हि॥ इति

अत्र क्रमेण 'यज्वा तु हासास्पदम्' न गाहन्ते गङ्गां न मज्जन्त्यम्भोधौ' सर्वकर्मत्यागिनः इति नासिकामूलपुण्ड्रधारिण इति च ये प्रसिद्धास्तेषां व्यावृत्तिः प्रतीयते। (पु १४७) एवं तैरनन्तरमेवोदाहृते – वैखानसे –) नासाग्रभागे कृतपीठपुण्ड्रं पवित्रपाणि खलु गर्भवैष्णवम्। इत्यादि दृश्यते। अत्र पवित्रपाणिमित्यनेन पवित्रधारणं न कार्यमिति मन्वानानां व्यावृत्तिः (पु १०८) 'पूर्वाचार्यपरम्पराविप्रतीपेषु नवनवेषु आचारेषु निष्ठिता नवीनाः यद्यदाचरन्ति यच्च यच्च कथयन्ति तेष्वभिनिवेशो मा भूदिति परमतात्पर्यमस्यास्सूक्तेः।'

(पु ५) उदाहृतप्रमाणयोः नासाग्रभागे इति स्पष्टं न तु नासिकामूल इति च । विशदीकृतश्चैतत् कारणसंहितायां तत्रैव तदुदाहृतायाम् – (पु १४८) ब्रह्माणं प्रति भगवद्वचनम् – सपादपुण्ड्राङ्कित फालदेशाः सुतप्तचक्राङ्कितबाहुमूलाः । अष्टाक्षरद्वादशमन्त्रजप्याः मद्भक्तवर्याः खलु भूतदेहाः ' (पु १४८) अष्टाक्षरद्वादशाक्षरादीनां जपो न कर्तव्यः इति स्थितानामिह व्यावृत्तिः । अत्र फालदेशस्य सपादपुण्ड्राङ्कितत्वोक्त्या पूर्वोदाहृतवचनयोरन्यत्र च नासाग्रशब्दः नासायाः पूर्वदेशपरः । तत्रैव पुण्ड्रं धार्यमिति सिध्यति ॥

एवमेव तदुदाहृतायां संहितायाम् – अष्टाक्षराजपी चैव ह्यपवित्रो मदर्चकः पादहीनोर्ध्वपुण्ड्रश्च रौरवं नरकं व्रजेत् । इति मन्त्रजपाभावे पवित्रधारणाभावे च रौरवनरकाप्तिरित्युक्तम् ॥

खगेश्वरसंहितायां स्वामिभिरुदाहृतायां (पु १३२) द्वादशाक्षरतत्त्वज्ञाः सदाऽष्टाक्षरसेवकाः । प्रपत्तिद्वय संयुक्तास्तदर्थे त्यक्तजीविताः । तद्गोष्ठीनिरता ये तु तद्भक्ताः पङ्क्तिपावनाः । परमैकान्तिनस्ते हि नारायण समा मताः ॥

पाद्मसंहितायां – नासिकायास्त्वधोभागो नासिकामूलमिष्यते । नासिकामूलमारभ्य ललाटान्तं प्रकल्पयेत् इति । (पु १३२)

वैखानससंहितायाम् – स्त्रीणाञ्चापि तथा चैव श्रीचूर्णं श्वेतमृत्तिकाम् । कूर्चमध्ये तथालिख्य चन्द्रमोर्धवदाचरेत् ॥ (पु १३३) इति

कात्यायनः – 'नासिकादेशमूले तु पीठं कृत्वा सवर्तुलम् । तस्योपरि न्यसेत्पुण्ड्रं केशान्तं धारयेत् सुधीः' इति (१५९ पु)

अत्र नासिकादेशमूले सवर्तुलपीठं कृत्वा तदुपरि पुण्ड्रं धारयेदित्युक्तम् । अनेन नासिकामूलं नाम स्वाध्यवहितपूर्वं पुण्ड्रधारणस्थलमेवेति सुस्पष्टम् । (पु १५९) तत्र 'सवर्तुलम्' कुण्डलीकृत पादद्वयाकृतीत्युक्तरीत्या अर्धचन्द्रवत् पुण्ड्रद्वयव्यापि सर्पफणास्थपीठतुल्यं पीठं धार्यम् । न नासायां इति सिद्धम् । एवं क्वचित् नासाग्रे पीठधारणम् । अन्यत्र नासामूले अपरत्र नासादौ धारणमिति प्रमितम् । तत्र सर्वत्र नासाया अग्रे प्राग्भागे नासाया मूले तत्प्राग्भागे नासादौ नासापूर्वदेशे इति एक एव देशः नासाग्र–नासामूल नासादिशब्दविवक्षित इति स्वीकर्तव्यम् । स च देशः नासावर्जितः भ्रूमध्याधोभाग एव । तत्र सवर्तुलपीठं धृत्वा पुण्ड्रधारणं कर्तव्यम् । नासिकाघटकेषु आदिमध्यान्तभागेषु क्वचिदपि पीठकल्पनं न कार्यमिति च सुप्रतिष्ठितम् । नासिकायां पीठकल्पनं पीठहीनतां पुण्ड्रस्य समर्थयतीति च प्रागेव प्रतिष्ठापितम् ॥

नासाग्रपादसंयुक्तपुण्ड्रयुक्ताः । इति उदाहृत बृहत्सेनसंहितावचने – नासा – नासेन्द्रियम्, अग्रे यस्य तत् नासाग्रं – नासानाळमित्यर्थः इति दर्पणकृतः, तत्पुरुषापेक्षया जघन्यो बहुव्रीहिः, समासघटकीभूतपदद्वयलक्षणाप्रसङ्गात् । नासेन्द्रियाधिष्ठानस्य नासाग्र-भागस्यैव नासेन्द्रियाग्रकत्वात् विग्रह एव फलम्, न पुण्ड्रपीठयोस्समासः । नासानाळपर्याप्तस्य द्वयङ्गुलकत्वस्य स्वाश्रयं पीठीकर्तुमक्षमत्वात् । नासादौ द्वयङ्गुलं पादमित्यनेनैकार्थ्या-सम्भवात् । पीठेन सह केशवोर्ध्वपुण्डस्य चतुरंगुलकत्वासम्भवाच्च ॥

नासायाः अग्रं-पूर्वभागः, नासायाः मूलम्–अन्तिकभागः, 'मूलमन्तिककुञ्जयो'रिति कोशात् । नासायाः आदिः-पूर्वो भागः, इति स्वरसतः त्रयाणामपि शब्दानां तत्पुरुषाश्रयणे 'नासाग्र' नासामूल–नासादि शब्दानां एकार्थत्वम् । त्रिभिरपि शब्दैः भ्रूमध्याधोदेशः नासावर्जं विवक्षितः । तत्र द्वयङ्गुलविस्तृतं पीठं पुण्ड्रेण सह संबद्धं चतुरङ्गुलं भवति पीठस्य विस्तारो द्वयङ्गुलम् । चतुरङ्गुलमूर्ध्वाग्रं पीठेन सहैव पुण्ड्रम् ॥

किञ्च हरेः पादाकृति पुण्ड्रे पादाङ्गुली कृशमध्यत्वादयः कुतो रेखायां प्रकाश्यन्ते ? ऋजुत्वहानिस्स्यादिति चेत् पीठस्य पद्ममुकुल – विकसित पद्माकारत्वयोः एकदा विरुद्धयोः रेखीकरणेपि ऋजुत्वहानिस्तुल्यन्यायात् ॥

मुकुलितस्य अधस्सूक्ष्मत्वाभावात् उपरिविस्तृतत्वाभावाच्च रेखायां नासागतायां वैपरीत्यकल्पनं न प्रामाणिकम् । हरिपादयोरपि ललाटस्थयोः विषमरेखाकल्पनापत्तिश्च । कुक्षादिकैकादशस्थानपुण्ड्रयोरश्रुतवैषम्यकल्पनं चेति एवमादयो दोषाः काल्पनिक केशवपुण्ड्र-धारिणां दुष्परिहरा इत्यलम् ॥

इदमप्यपरमवधेयम्–ऊर्ध्वपुण्ड्रमेकैकं एकैकपादरूपम् ? पादद्वयरूपं वेति । पुण्ड्रस्यै-कत्वे पादमप्येकम् तस्य द्वित्वे इदमपि तथेति समाधिः । तथा हि द्वादशावयवाः द्वादश पुण्ड्राणि द्वादश पादाः । यदि द्वादशावयवेषु प्रत्येकं द्वौ द्वौ इति चतुर्विंशतिहरिपादाः स्वीक्रियन्ते तर्हि चतुर्विंशतिरूर्ध्वपुण्ड्राणि इत्येष्टव्यमेव । कथमिति चेत् ? दर्पणानुसारेणैव । दर्पणकृद्भिः–'स्मार्तैकदेशिधृतैकपादाकार चन्दनोर्ध्वपुण्ड्रवत् कल्पितोर्ध्वपुण्ड्रमध्ये श्रीचूर्ण-धारणार्थं भेदकरणरूपदोषप्रसक्तेः' (पु-१३९) इत्येवमेकपादेपि ऊर्ध्वपुण्ड्रव्यपदेशः आम्रेडितः । प्रतिपादं पादत्वमिव पुण्ड्रत्वमपि पर्याप्तमिति सिद्धम् । तथाचायमेकः पादः अयञ्चैकः पादः इत्यपेक्षाबुद्धया हरिपादयोः यथा द्वित्वमिष्यते तथा इदमेकं पुण्ड्रं इदमप्येकं पुण्ड्रमित्यपेक्षा-

बुद्ध्या पुण्ड्रद्वित्वमप्यङ्गीकरणीयमेव। तत्र चेत् पुण्ड्रे, पादेपि तथैव। तर्हि एकस्मिन् पादे श्रीचूर्णार्थं भेदकरणप्रसङ्गः इति यदुक्तं तत् पुण्ड्रेपि तुल्यम्। पादत्वपर्याप्त्यधिकरणे पुण्ड्रत्वस्यापि पर्याप्तेः। अत एव त्रिपुण्ड्रमिति व्यपदेशोपि स्मार्तानां शैवानाञ्च ॥

तर्हि केशवोर्ध्वपुण्ड्रमेकम् इत्येवं द्वादशपुण्ड्रव्यवहारः द्वादशपादव्यवहारेपि तुल्यः। तद्वा तादृग्वेति न कश्चित् विशेष इति न्यायात् ॥

पुण्ड्रयोर्वामदक्षिणयोः भिन्नत्वेपि पीठात्मकोभयसंयोगस्यैकत्वात् एकं पुण्ड्रमिति व्यपदेशः। न तु स्वरूपतः अपित्वौपाधिकः। तथा पादयोरपि एकत्वव्यपदेशः अपरिहार्यः यथा चुळकिततीर्थाचमनानां भेदेपि त्रयाणां मिळितानामेकमाचमनमिति व्यपदेशः यथा वा एकः प्राणायाम इति त्रिः पठितानां। यथा वा राशितापन्नानां व्रीहीणां बहूनां एको व्रीहिरिति एवमिहापि ॥

अतो द्वादशोर्ध्वपुण्ड्राणीति प्रमाणबलात् द्वादश पादा एव। न तु चतुर्विंशतिः। श्रीचूर्णार्थं हरिपादरूपस्यैकस्य पुण्ड्रस्य छेदनं यथा नेष्यते तथा पादेपि। चिदचिदीश्वराणां मिथो भिन्नानां विशिष्टाद्वैतमेव हि। न तस्यात्र सर्पमारः। यथा आलयस्योपरि पार्श्वयोः मध्ये च गोपुरप्राकार द्वारादिरूपावयवभेदेन भिन्नत्वेपि सङ्घातैक्यविवक्षा तद्वत् पादैक्यम् ॥

यदलेखि (पु १४२) सच्चरित्ररक्षायां श्रीचूर्ण पीठञ्च नोक्तमिति तदापाततः। ऊर्ध्वपुण्ड्रस्य मध्येतु विशालेऽतिमनोहरे। लक्ष्म्या साकं समासीनो रमेऽहं तत्र निर्वृतः। निरन्तरालं यः कुर्यात् ऊर्ध्वपुण्ड्रं द्विजाधमः। स हि तत्र स्थितं विष्णुं श्रियञ्चैव व्यपोहति इति ब्रह्माण्डपुराणस्योदाहरणात् ॥

ब्रह्मरात्रे – निरन्तरालं यः कुर्यात् ऊर्ध्वपुण्ड्रं विमोहितः। स हि तत्र स्थितं विष्णुं श्रियञ्चैव व्यपोहति इति चोक्तम्। सर्वमिदं श्रीचूर्णधारणावश्यकत्वपरमेव हि। एवं नासिकामूलमारभ्य ललाटे प्रथमं न्यसेत्। इति सपीठस्यैवोर्ध्वपुण्ड्रस्य धारणीयत्वं स्थापितम्। पीठस्यैव हि नासिकामूलतः आरम्भः। नासिकामूलञ्च नासायाः पूर्वः भ्रुवोरधस्ताद्भाग इत्युक्तं प्रागेव अतः पीठश्रीचूर्णे सच्चरित्ररक्षायां नोक्ते इति प्रामादिकं स्वामिलेखनम् ॥

यत्तु व्यासस्मृत्युत्तरखण्डे–'अम्भोजमुकुलाकारं पादं द्वयङ्गुलसम्मितम्। नासिकादिभ्रुवोर्मध्यपर्यन्तं परिकल्पयेत्' इति ललाटोर्ध्वपुण्ड्रस्य द्वयङ्गुलपरिमितपादवैशिष्ट्यप्रतिपादनेन भगवच्छास्त्रे 'नासादौ द्वयङ्गुलं पादम्' इत्युक्तत्वेन पद्माकारपादाधःप्रदेशमारभ्य सश्रीचूर्ण-

शाखाद्वयाग्रपर्यन्तं परिमाणगणनावश्यकत्वेन शिष्टाः ऊर्ध्वपुण्ड्रं तथैव धारयन्ति। सपादमूर्ध्व-पुण्ड्रं तु द्विषट्स्थानेषु विन्यसेदिति बृहन्नारदीयादिवचनम्। इति च (पु १४३)

अत्र नासिकादि इत्यत्र षष्ठीतत्पुरुषश्चेत् नासायाः आदौ भ्रुवौ तयोः मध्ये इत्यर्थः। नासिकां विहाय तत्पूर्ववर्तिदेशपर्यन्तं पादं परिकल्पयेत् इति लभ्यते। सिद्धे सत्यारम्भो नियमाय कल्पते इति न्यायः। नासिकायाः पूर्ववर्तिन्योः भ्रुवोरेव मध्ये पादमिति फलति। यदितु नासिकादीति बहुव्रीहिः परिकल्पनक्रियाविशेषणम्। क्रियाविशेषणानां कर्मत्वम्। कर्मणि द्वितीयेत्यनुशासनात्। इति विवक्षितम्; तदा तद्गुणसंविज्ञानः अतद्गुणसंविज्ञानो वाऽत्र बहुव्रीहिरिति विमर्शनीयम्। नाद्यः। पद्माकारपादाधःप्रदेशमारभ्य शाखाद्वयाग्रपर्यन्तं' परिमाणगणनावश्यकत्वेन इति स्वामिभिरेव कण्ठोक्तत्वेन तथा गणने केशवपुण्ड्रस्य सप्ताष्टादि-परिमाणकत्वापत्तेः चतुरङ्गुलमूर्ध्वाग्रमित्यस्य व्याहतेः। उक्तं हि स्वयमेव भ्रुवोरधस्तात् चक्षुर्मध्यं तदधस्तात् नासिका – तदधस्तात् नासिकामूलमिति' नासिकामूले द्व्यङ्गुलं तदुपरि भ्रूर्यन्तमङ्गुलान्तरं तदुपरि चतुरङ्गुलमिति हि सिद्ध्यति। नासाग्रे द्व्यङ्गुलं पादमिति स्वोदाहृतप्रमाणपरामर्शेतु नासाग्रादि भ्रूमध्यपर्यन्तं चतुरङ्गुलान्यूनं पादम्। तदुपरि चतुरंगुल ललाटे आहत्याष्टाङ्गुलादिपरिमाणं केशवपुण्ड्रमिति न तस्य चतुरंगुलत्वसिद्धिः॥

किञ्च – सपादमूर्ध्वपुण्ड्रं तु द्विषट्स्थानेषु विन्यसेत् इति स्वोदाहृतबृहन्नारदीयादि-वचनस्य स्वेनैव बाधनम्। नासिकया सह त्रयोदशत्वात् स्थानानाम्॥

अपि च अम्भोजमुकुलस्याग्रे सूक्ष्मत्वात् अधः स्थूलत्वात् तद्वैपरीत्येनाग्रे स्थूलतया अधः सूक्ष्मतया पादलेखनं दृष्टान्तवचनविप्रतीपम्। हरिपादयोः अग्रे विशालतया अधस्सूक्ष्मतया स्थितयोः, रेखायां मूलाग्रयोः ऋजुत्वावश्यकत्वविधायकवचनबलात् समपरिमाणतया पुण्ड्रे लेखनवत् अम्भोजमुकुलाकृतिपादस्यापि आर्जवावश्यंभावेनोर्ध्वाग्रयोस्समपरिमाणवत्वावश्यं-भावेन मृणालदण्डाकारस्य ऊर्ध्वाग्रसमपरिमाणस्य द्व्यङ्गुल त्र्यङ्गुल चतुरंगुलादि परिमाणवत्तया नासाग्रे द्व्यङ्गुलम्, नासामूले द्व्यङ्गुलं नासादौ द्व्यङ्गुलं इत्येवं पृथक् पृथक् परिमाणवत्तया प्रमाणैः प्रतिपन्नस्य भ्रूमध्यमात्रविश्रान्तस्य शाखाद्वयसम्बन्धगन्धस्याप्यभावेन पीठत्वानु-पपत्तिः। पादस्य एकाङ्गुलत्वपक्षे तु सुतराम्। अतः तद्गुणसंविज्ञानो बहुव्रीहिर्न सम्भवति। तथा सति द्वादशस्थानेषु द्वादशपुण्ड्राणीत्यस्य वैघट्यात्। नासिकया सह त्रयोदशस्थानानि तदा भवन्ति। पादपीठेन सह परिगणने ललाटोर्ध्वपुण्ड्रस्य चतुरङ्गुलोर्ध्वाग्रत्वानुपपत्तिश्च। द्व्यङ्गुलस्य नासिकायामेव परिसमाप्तत्वात मध्ये विच्छेदावश्यंभावात् नासामूलपुण्ड्रस्य पीठत्वा-

सम्भवश्च फणिफणापुण्ड्रस्यैव हरिपादद्वयाकृतित्वं, सपीठत्वमधो वर्तुलभागेन, पीठेन सह चतुरङ्गुलत्वं, कुक्ष्यादिपुण्ड्रैकरूप्यं समस्तप्रमाणशिष्टाचारानुगुणत्वं चेति नासिकापुण्ड्रपक्ष-प्रतिक्षेप्य एव ॥

कुक्ष्यादिपुण्ड्रशोधनम्

यदाहुस्स्वामिनः – 'कुक्ष्याद्यङ्गेषु स्थूलपीठमध्ये पद्माकारपादं लिखित्वा तदुपरि ऊर्ध्वपुण्ड्राणि धारयन्ति 'तथा कुक्ष्यादिकाङ्गेषु पादन्तु चतुरश्रकम्' इति व्यासोत्तरस्मृत्यादि-वचनैः कुक्ष्यादिषु चतुरश्रपीठकल्पनमपि प्राप्तम्, सपादमूर्ध्वपुण्ड्रं तु द्विषट्स्थानेषु विन्यसेत् इति बृहन्नारदीयादिवचनैः कुक्ष्यादित्रिक्रान्तेषु एकादशसु स्थानेषु द्वयङ्गुलपरिमितपद्माकारपाद-सहितोर्ध्वपुण्ड्रधारणमपि प्राप्तम्, अतस्स्थूलपीठमध्ये पद्माकारपादं लिखित्वा धारयन्ति। श्रीरङ्ग-गोपुरादिषु स्थूलपीठोपरि सपादोर्ध्वपुण्ड्रं प्रकाशते; कथमिदमुपपद्यते इति चेत् मण्टपगोपुर-प्रासादादिषु विस्तृतत्वात् सपादोर्ध्वपुण्ड्रपीठयोः परिमाणप्रमाणवचनाभावात् उभयोः भेदः इति (पु १४२-१४३-१४४)

अत्र पृच्छ्यते। चतुरश्रं द्वयङ्गुलं पादपीठं कुक्ष्यादिषु। तदुपरि द्वयङ्गुलं नासिकाया-मिव कमलकुड्मलाकारम्। तदुपरि विकसित पद्माकारं द्वयङ्गुलम्। तदुपरि नासिकादेशमूले तु पीठं कृत्वा सवर्तुलम्। तस्योपरि न्यसेत् पुण्ड्रम् इति कात्यायनवचनात् (पु १५९) कुण्डलीकृत-सर्पेति प्रमाणाच्च द्वयङ्गुलं वर्तुलपीठं इत्येवं पीठोपपीठक्रमेणाष्टाङ्गुलपरिमितानि पीठानि स्वोपरि हरिपादयोः अष्टाङ्गुलयोर्दशाङ्गुलयोर्वा न पीठाकृतीनि भवन्ति अपि तु पीठोपपीठा-कृतीन्येव। न हि कश्चित् वैष्णव ईदृशपुण्ड्रधारी दृष्टः श्रुतो वा। न हि वर्तुलं चतुरश्रं मुकुलाकृति विकसिताकृति चैकं पीठं भवितुमर्हति, सहजसङ्कर्षात्। नापि तासामाकृतीनामभेदः अत एव। नापि तासामन्योन्यस्मिन् अन्योन्यान्तर्भावः अत एव। अत एतैः प्रमाणैः पूर्वैः कैश्चिदप्यनुदाहृतैर्मार्जारवत् स्वापत्यमेव जिघांसन्ति। चतुरङ्गुलेषु गोविन्द-त्रिविक्रम-हृषीकेश-पद्मनाभ-दामोदरपुण्ड्रेषु तेषां स्वरूपसत्तापि न लभ्येत स्वाधिकपीठपरम्परापीडितत्वात्। 'चतुरश्रं ब्राह्मणस्य ... वैश्यस्य वर्तुलाकारम्। (पु २१) इति मिथो भेदं स्वयमेव स्थापया-मासुस्स्वामिनः सति चैवं प्रासादखट्वापर्यङ्कन्यायेनोपर्युपरिपीठानां समुच्चयो हि कार्यः। अन्यथा तदभावाधिकरणन्यायविरोधात्। तत्र हि-तदभावः-स्वप्नाभावः-सुषुप्तिः, नाडीषु-पुरीतति आत्मनि च भवति। कुतः तच्छ्रुतेः – त्रयाणां स्थानत्वश्रुतेः सम्भवति च प्रासादखट्वा-पर्यङ्कवन्नाड्यादीनां कार्यभेदः। तत्र नाडीपुरीततौ प्रासादखट्वास्थानीयौ। ब्रह्म तु पर्यङ्क-स्थानीयम्' इति श्रीभाष्यम्। तदभावो नाडीषु तच्छ्रुतेरात्मनि च इति सूत्रम्।

एतेनेदमपि प्रत्युक्तम् – यदाहुस्स्वामिनः — 'चतुरश्रपीठं विलिख्य, तदुपरि सपादोर्ध्वपुण्ड्रलेखने वचनोक्ताङ्गुलपरिमाणाधिक्यदोषः प्रसजति। अतस्तन्त्रेण कुक्ष्याद्यङ्गेषु द्व्यङ्गुलपरिमितं चतुरश्रपीठं परिकल्प्य तन्मध्ये पीठाधोभाग मारभ्य पीठाग्रपर्यन्तं परिशेषात् द्व्यङ्गुलपरिमितं ईषद्विकसितपद्माकारपादं परिकल्प्य तदुपरि उभयपार्श्वयोरूर्ध्वाग्रे हरिपादाकार-शाखे .... मध्ये श्रीचूर्णरेखां च धारयन्ति" इति चतुरश्रपीठ पद्माकारपीठयोः पृथक् पृथक् प्रमाणप्रतिपन्नयोः स्वेच्छया तन्त्रेणान्तर्भावस्य तदभावाधिकरण सूत्रभाष्य विरुद्धत्वात्। उपर्युपरि लेखने वचनोक्ताङ्गुलपरिमाणाधिक्यदोषः प्रसजतीति यदुक्तं तत्तथैव। अतस्तन्त्रेण कृतमिति चेत् दर्शिताधिकरणविरोधः। सेयमुभयतःपाशा रज्जुः॥

यत्तु 'पादन्तु चतुरश्रकम्, इति व्यासस्मृत्युत्तरखण्ड चतुर्थाध्याय वचनबलात्, कुक्ष्यादिषु चतुरश्रस्थूलपीठमात्रं विशेषः पद्माकारपादसाहित्यं तुल्यं' इति अम्भोजमुकुलाकारं पादं तु चतुरश्रकम्। चतुरश्रपीठयुक्तं चतुरश्रपीठमध्यस्थम् इति यावत्। चतुरश्रकं अस्य अस्तीति चतुरश्रकम्। मत्वर्थीयः अचूपत्ययः। सचतुरश्रकमिति पाठश्चेत् अर्थः स्वरसः' (पृ १४०-१४१) इति चतुरश्रकमिति बहुव्रीहिणा लब्धेर्थे मत्वर्थीयो निरर्थकः। अस्यास्तीति विग्रहे मुकुलाकारपीठनिरूपिताधेयतावत् चतुरश्रकपीठम् इति बोधः। सति चैवं मुकुलाकारपीठोपरि चतुरश्रपीठम् इत्येव सिद्धयति। न तु चतुरश्रकमध्ये मुकुलाकारपीठमिति। चतुरश्रपीठमध्ये मुकुलाकारपीठं शिष्टा धारयन्तीति तु दृष्टापह्नवः। सवर्तुलपीठस्यापि मध्ये धारणं, एवं विकसितपद्माकारपीठस्यापीति स्वैरभाषणम्॥

निगमनम्

भगवत्पादपीठं चतुरश्रं उपरि मुकुलाकारं ईषद्विकसिताकारं च सवर्तुलं च दृश्यते। सर्वमिदं रेखायामपि दर्शनीयमिति न। नहि भगवत्पादद्वयं अंगुल्यादिसहितं मध्ये कृशं तदधो-भागे किञ्चित् वर्तुलञ्च दृश्यत इति पुण्ड्रेपि स सन्निवेशोस्माभिर्धार्यः। ऋजुत्वोच्छेदप्रसङ्गात्। तथैव पीठेपि। फणिफणार्पितं ते पदाम्बुजमिति श्रीगोपिकागीतम्। मत्पदानि च ते दृष्ट्वा इत्यन्यत्र चोक्तम्। नित्यसूरिप्रथमस्य शेषस्य शीर्षे भगवत्पादद्वयाकृति रेखाद्वयमिति च श्रीकृष्णपादप्रभृतिभिः कण्ठोक्तं व्याख्यातृभिः। तदधस्तात् वर्तुलाकारं अर्धचन्द्राकृति धनुराकारं रेखापादं। पीठभूतमिदमेव। एकाङ्गुलमिति पुण्ड्रपार्श्ववत्। द्व्यङ्गुलमिति च विस्तारपरम् पुण्ड्रोर्ध्वरेखायाः चतुरङ्गुलत्ववत्। ततश्च एकाङ्गुलपादेन पार्श्वेन च सहितं

चतुरङ्गुलोर्ध्वाग्रेण द्व्यङ्गुलविस्तृतपीठेन च सहितं केशवपुण्ड्रम् एवमेव कृष्ण्यादिपुण्ड्रमपि पीठेषु केशवपुण्ड्रसमानाकारं प्रतिनियतोर्ध्वाग्रमध्याङ्गुलविशेषसहितं धार्यमिति। केशवादिध्यानवत् अधः पीठे भगवत्पीठभेदध्यानं कार्यम्। न तु सन्निवेशभेदः प्रदर्शयितव्यः ॥

इति प्रमाणसम्मतः शिष्टोर्ध्वपुण्ड्रविधिः समाप्तः ॥

वैश्वदेवावश्यकत्वविवेचनम्

यत्तु प्रथमप्रतिफलने–वासुदेवसंहितायाम्–

'मद्यागानन्तरं देवि वैश्वदेवं विना रमे।
अनुयागस्तदा कार्यः परमैकान्तिभिर्द्विजैः' इति ॥

'वैश्वदेवरहितं तदीयाराधनं कुर्यात्' २१-३-पु) इति चोक्तम्। इदं सुमहद् दर्पणस्य मालिन्यम्। वैश्वदेवं विना अनुयागः अकार्यः। वैश्वदेवं कृत्वैव कार्य इति हि संहितार्थः। अकार्यः इति पदच्छेदः। तथाहि–अष्टाङ्गं यजनम्। जयाख्यसंहितायां श्रीभगवानुवाच–

१ अन्तःकरणयागादि यावदात्मनिवेदनम्।
तदाद्यमङ्गं यागस्य तच्चाभिगमनं महत् ॥

२ पूजनञ्चार्घ्यपुष्पाद्यैर्भोगैर्यदखिलं मुने।
बाह्योपचारैस्तद्विद्धि भोगसंज्ञन्तु नारद ॥

३ मध्वाज्याक्तेन दध्ना वै पूजा च पशुनापि वा।
तत् तृतीयं हि यागाङ्गं ४ तुर्यमन्नेन पूजनम् ॥

५ निवेदितस्य यद्दानं पूर्वोक्तविधिना मुने।
संप्रदानं तु तन्नाम यागाङ्गं पञ्चमं स्मृतम् ॥

६ वह्निसन्तर्पणं षष्ठं ७ पितृयागस्तु सप्तमम्।

८ प्राणाग्निहवनं नाम्ना त्वनुयागस्तदष्टमम् ॥ इति निर्णीतम् ॥

अत्रापि तदेवोच्यते। मद्यागानन्तरं षष्ठतया सप्तमतया चाङ्गत्वेन प्रमितं वह्निसन्तर्पणं पितृयागश्चवैश्वदेव पञ्चमहायज्ञशब्दवाच्यं विनाऽनुयागो न कार्यः विना

वैश्वदेवमष्टाङ्गासिद्धेः इत्यर्थः । अनुयागः 'अनुः-हीने' हीनयागो न कार्य इत्यपि सुवचम् । वैश्वदेवं विना कार्यः हीनयाग एव इति वार्थः ॥

दैवासुरसम्पद्विभागयोगनाम्नि गीतायोडशाध्याये—'दानं दमश्चयज्ञश्च स्वाध्यायः' भवन्ति सम्पदं दैवीमभिजातस्य पाण्डव' इति गीतं भगवतैव । अत्र भाष्यम्—'यज्ञः-फलाभिसन्धिरहितभगवदाराधनरूपमहायज्ञाद्यनुष्ठानम् । ..... देवसम्बन्धिनी सम्पत् दैवी-देवाः भगवदाज्ञानुवृत्तिशीलाः, तेषां संपत्-सा च भगवदाज्ञानुवृत्तिरेव' अतः वैश्वदेवत्यागिनां दैवप्रकृतित्वं नास्तीति सिद्धे कुतो गृहस्थत्वम्-कुतस्तरां वैष्णवत्वम् । कुतस्तमां मोक्षसिद्धिः । 'दैवी संपद्विमोक्षाय निबन्धायासुरी मता' । इति हि तदुपरि गीता । ज्ञानी तु परमैकान्तीति यामुनार्याः गीतार्थसंग्रहे ॥

तस्य वैश्वदेवाभावः इति वासुदेवसंहिताया अपार्थवर्णनं वासुदेवेनैव प्रत्यस्तम् । पञ्चमहायज्ञस्य नित्यत्वं बहुशः प्रपञ्चितं श्रीमद्गीताभाष्ये ॥

अदृश्यत्वाधिकरणे 'श्रुतिस्मृतिचोदितेषु कर्मस्वेकतरवैधुर्येपिइतरेषामनुष्ठितानामपि निष्फलत्वं' इति श्रीभाष्यम् । अनेन 'यस्याग्निहोत्रमदर्शपूर्णमासमनाग्रयणमतिथिवर्जितञ्च हुतमवैश्वदेवमित्यस्यार्थोऽभिप्रेतः' इति श्रुतप्रकाशिका वैश्वदेवाकरणे प्रत्यवायस्तत्रैवोपर्यार्थवर्णे श्रुतः ॥

गीताष्टादशाध्याये—नियतस्य तु सन्यासः कर्मणो नेपपद्यते । मोहात् तस्य परित्यागस्तामसः परिकीर्तितः ॥ इत्यत्र 'नियतस्य नित्यनैमित्तिकस्य महायज्ञादेः कर्मणः सन्यासः—त्यागो नोपपद्यते ।' शरीरयात्रापि च ते न प्रसिद्धयेदकर्मणः' इति शरीरयात्राया एवासिद्धेः । शरीरयात्रा हि यज्ञशिष्टाशनेन निर्वर्त्यमाना सम्यग्ज्ञानाय प्रभवति । अन्यथा 'ते त्वघं भुञ्जते पापाः' इत्ययज्ञशिष्टाघरूपाशनाप्यायनं मनसो विपरीतज्ञानाय भवति । .. तस्मात् महायज्ञादिनित्यनैमित्तिकं कर्माप्रयाणात् ब्रह्मज्ञानायैवोपादेयमिति तस्य त्यागो नोपपद्यते । एवं ज्ञानोत्पादिनः कर्मणो बन्धकत्वं मोहात् परित्यागस्तामसः परिकीर्तितः' इत्यादि भाष्यम् ॥

पराशरस्मृतौ—सन्ध्या स्नानं जपो होमो देवतानाञ्च पूजनम् । वैश्वदेवातिथेयं च षट्कर्माणि दिनेदिने 'इति अहरहस्सन्ध्यामुपासीते'तिवत् वैश्वदेवस्य नित्यत्वं स्मृतम् । विस्मृतमिदं दर्पणकृद्भिः ॥

श्रीप्रश्नसंहितायाम् सप्तदशाध्याये – स्वगृहाराधको यस्तु पूजयेत् पाञ्चरात्रतः। ... नित्यश्राद्धादिकं कृत्वा वैश्वदेवबलिं ततः। ... वृद्धैरतिथिभिस्साकं मौनी भुञ्जीत वैष्णवैः। (श्लो. ४८-४९) 'पञ्च वा एते महायज्ञास्सतति प्रतायन्ते सतति सन्तिष्ठन्ते' इत्यादि स्वाध्यायब्राह्मणम्। आर्याः प्रयता वैश्वदेवे इति स्मृतिः वैश्वदेवरहितानां अनार्यत्वमाह। सामान्यविषयमिदमिति चेत् मान्यविषयत्वं सन्ध्यादिष्वपि नास्तीति कल्प्यताम् ॥

मनुः – विघसाशी भवेन्नित्यं नित्यश्चामृतभोजनः ।
विघसं भुक्तशिष्टं स्यात् यज्ञशिष्टं तथाऽमृतम् ॥

इति अतिथ्यादिशिष्टं विघसम्। वैश्वदेवशिष्टं अमृतम्। श्रुतिः – केवलाघो भवति केवलादी इति अवैश्वदेवाः अघभुजः। देशिकैश्च 'नित्यं चैतत् वैश्वदेवादिवत् भगवत्समाराधनमिति' नित्यानुष्ठानस्थापनाधिकारे वैश्वदेववत् इति दृष्टान्तीकृतम्। 'अमेध्यं भोजनं तामसप्रियम्' इति गीता। 'अमेध्यम्–अयज्ञार्हम् अयज्ञशिष्टमित्यर्थः एवंविधं तमोमयं भोजनं तामसप्रियं भवती'ति गीताभाष्यम्। श्रीभाष्यकारा व्यवहितशिष्य वङ्गीशकारिकायाश्च – पूजानन्तरं कर्तव्यानि – होमं पितृक्रियां पश्चादनुयागादिकं च यत् (५०१) इति वैश्वदेवावश्यकत्वं श्रीभाष्यकारानुशिष्टं सङ्गृहीतम् ॥

'பூதமைந்தோடு' इति श्रीविष्णुचित्तगाथा श्रीवैष्णवामामुत्कर्ष उच्यते इत्यवतार्य भगवद्भागवतमुखोल्लासैकप्रयोजनं पञ्चमहायज्ञानुष्ठानं कुर्वद्भिर्भङ्गलाशासनपरैः महिता श्रीमद्गोष्ठीपुरीति व्यचक्रुर्वरवरमुनयः। श्रीवैष्णवममयाचारनिष्कर्षेपि वैश्वदेवावश्यकत्वमुक्तम्। परमगुरुभिः प्रपन्नपारिजाते' सन्ध्यार्चापञ्चयज्ञादितन्मुमुक्षुभिरादृतम्। नैमित्तिकञ्चाग्रयणं सीमन्तोन्नयनादिकमित्यनुग्रहीतम्। 'सर्वमिदमपरामृश्य पातयन्ति दर्पणाभिमानिनो ग्रन्थकृतः ॥

दर्भपवित्रधारणावश्यकत्वविवेचनम्

तृतीयप्रतिफलने स्वामिनः दर्भपवित्रधारणे सुबहूनि प्रमाणान्युपन्यस्य वैष्णवैः केषुचित्कर्मसु दर्भपवित्रधारणमभ्युच्चयः कैश्चिद्वैष्णवैस्सर्वकर्मसु तद्धारणमप्यभ्युच्चयमात्रमित्याहुः तावति तु सन्तुष्यन्तु सन्तः असुरविद्रावणादिफलं तु सन्ध्यायामपि 'मन्देहारुणे द्वीपे प्रक्षिपन्ति इति श्रुतिः। पवित्रफलमपि तथैव, अतस्तद्धारणं नित्यं सन्ध्यावत् ॥

अत्र स्वामिनः–'परगतस्वीकारफलीभूतस्वगतस्वीकार - तत्कार्य परार्थानुभवादिस्थले चेतनस्य प्रयोज्यत्वेनाप्रधानतया भगवत एव प्रधानकारणत्वात् । परगतस्वीकारफल स्वगतस्वीकारादयस्सर्वेपि तेनैवाऽगतसत्त्वान्तर्गतत्वात् स्तनन्धयस्य मातृस्तन्यवत् गुणोत्तरत्वात् सर्वेषामुपादेया एवेति स्वरसत एव सिद्धयतीति स्वगतस्वीकारपरगतस्वीकार निरूपणं कृतम् श्रीवचनभूषणमीमांसाभाष्ये' इति [39. पु.] अयमेव साक्षादैशिकसम्प्रदायः । उपायस्वप्राप्तेरित्यादिषु स्पष्टीकृतः । तदिदं स्वगतस्वीकारस्वरूपमपरामृश्य एतेषां परार्थानुभव एवेत्यविगणय्य च दृश्यतां शिरसि गाढप्रहार एष आधुनिकानाम् ॥

तत्क्रतुन्यायस्यायोगव्यवच्छेदकत्वम्

अप्रतीकालम्बन सूत्र श्रीभाष्यादिषु तत्क्रतुन्यायेनान्ययोग व्यवच्छेद एव कृतः इति तत्क्रतुन्यायः नायोगव्यवच्छेदार्थकः अन्ययोगव्यवच्छेदार्थक एव इति लिखन्ति [45. पु.] अत्र एवकारेण अयोगव्यवच्छेदार्थकत्वं निषिध्यते । यथोपासनं फलं नास्ति फलान्तरमप्यनुपासितं नास्ति इति मुक्तये जलाञ्जलिर्दत्तो भवति । अन्ययोगव्यवच्छेदोपीति न ब्रुव्यते ॥

कैवल्यविषयविवेकः

योगिनाममृतं स्थानम् । अत्र श्रीविष्णुचित्तीयम्–'योगिनामिति आश्रमिष्वेव ये प्रतीकोपासकाः योगिनः तेषां अमृतं विष्णुपदाख्यं ध्रुवादुपरिस्थानम् । यतो गङ्गा प्रवहतीति वक्ष्यमाण'मिति । विष्णुपदे स्थिताः तत्र लब्धज्ञानाः मुच्यन्ते न तु तत् मुक्तैर्लभ्यं स्थानमिति चोपर्याहुस्स्वयमेव श्रीविष्णुचित्तार्याः । संसारपरमव्योम्नोरिति भट्टार्यभाष्यमप्येतत् परमेव । परमव्योम विष्णुपदाख्यं प्राकृतस्थानम् । संसारः तदधः नित्यसृष्टिविषयः तयोः मध्ये कैवल्यमिति भाष्याशयः । विरजापरमव्योम्नोरिति पाद्मपुराणमपि विरजाधस्स्थितं ध्रुवादुपरिस्थानं परमपदत्वेन व्यपदिशति । तदिदं कैवल्यविचारग्रन्थे मया विवेचितमेव । अत्र स्वामिभिरुपदर्शिता रहस्यमञ्जरी न सदस्यतामर्हति ॥

यत्तु वैष्णव - एकान्ति - परमैकान्तिनां भेदः उपायतयानुष्ठानं - कैङ्कर्यतयानुष्ठानं भोगतयानुष्ठानमिति (१२३) ज्ञानीतु परमैकान्तीति गीतार्थसंग्रहे श्रीयामुनार्याः । तस्य कैङ्कर्यतयानुष्ठानं वा भोगतया वा । मोक्षे कैङ्कर्यसिद्धिः एकान्तिनामेव न परमैकान्तिनां स्वार्था परार्था वा इति सिद्धयति । वैष्णवत्वं एकान्तित्वञ्च न परमैकान्तिनामिति हि सिध्यति ॥

प्रपन्नानां कैङ्कर्यबुद्ध्यैवानुष्ठानमिति चानुपदमुच्यते अहो दर्पणकृतां स्वैरिता ।

यत्तु विहगेन्द्रसंहितायाम् योगपादोत्तरखण्डे सप्तसप्ततितमेऽध्याये —

'मत्स्वीकारस्वरूपायाः प्रपत्तेरप्युपायताम् ।
इच्छन्ति केचित् दुर्दान्ताः सन्तो मामेव मन्यते ॥ इति [40. पु.]

अत्र स्वीकारेत्यनुक्त्वा मत्स्वीकारेःयुक्तम् परगतस्वीकारोपि प्रपत्तिः उपायश्च इति दुर्दान्तानामभिमानः । सन्तस्तु 'उपायस्त्वप्राप्तेरुपनिषदधीतस्य भगवान्' 'प्रपत्तेर्न्यासमात्रत्वम्' 'न्यासाद्यास्सहकारिणः' "சாதநமும் சரணநெறியன்றுமக்கு" इत्यादि-देशिक सूक्तिनिष्ठाः मामेव श्रीविशिष्टं सिद्धोपायं मन्वते इति भावः ॥

उदाहृतश्लोके मन्यते इत्यपपाठः—'मन्वते' इति साधुः । किञ्च १. उपक्रम-प्रमाणः २. प्रथाङ्गुलीनां ३ रामानुजाख्याञ्चितं तान्तादर्धिशुभं प्रपन्नजनतासाविति-काख्यां जगौ ४. इतरजातीनां पवित्रं निषेधय ५. वरवरमुनिप्रणीतसंस्कृताराधनकारि-कायाम् ६. सन्तो मामेव मन्यते ७. आर्षत्वच्छन्दसाम्यां ८. वयं वर्ते ९. वैष्ण-वानां इतराणाञ्च १०. रामानुजाचार्यः अनुजगृहुः । ११. प्रार्थयित्वा । १२. भक्तिः विलक्षणम् १३. इत्यन्त आचार्यहृदयसूक्तिः इत्यादयश्चापभ्रंशाः जाग्रति ॥

॥ सदनुष्ठानसंग्रहः ॥

आह्निकं नाम अह्नि भवं सच्चरितम् । तच्च सङ्ग्रहेणोक्तम् । 'कल्योद्बोधोच्युताङ्घ्रि-स्मरणमुषसि च स्नानमर्घ्यं जपोग्रौ होमश्च ब्रह्मयज्ञो हितमजनमथ स्नानमध्याह्नकृत्ये । विष्ववर्चा वैश्वदेवं मखविधिरशनं सत्प्रबन्धानुसंधा सन्ध्याहोमार्चनाद्यं श्रुतिमननमिति प्रत्यहं सच्चरित्रम् इति । (स्मृतिरत्नाकरः) मखविधिः पञ्चमहायज्ञः । व्यासः 'श्रौतं कर्म नचेच्छक्तः कर्तुं स्मार्तं समाचरेत् । तत्राप्यशक्तः करणे सदाचारं लभेत् बुधः ।' इति दर्पणस्यापि सम्मतम् । वैश्वदेवं मखविधिः इत्युभयं त्यक्तं दर्पणे । नित्यग्रन्थे भगवता भाष्य-कृता सन्ध्योपासनानन्तरं आधारशक्त्यादि पृथिव्यन्तं तर्पयित्वा — श्रीवैकुण्ठादिपार्षदान्तं तर्पयित्वा इत्यनुगृहीतम् । तच्छिष्यैर्वङ्गीश्वरगुरुभिश्च सन्ध्योपासनानन्तरं 'तत आधार-शक्त्यादीन् तर्पयित्वा स्वनामभिः । नमोन्तैः प्रणवोपेतैः निष्पीड्य स्नानशाटिकाम् (श्लो. ७९) इत्यनुगृहीतम् । श्रीपराशरभट्टारकैश्च 'स्वोर्ध्वपुण्ड्रश्च तर्पयेत् । मन्त्रैराधारशक्त्यादि पारिषद्यान्त संस्थितैः इति देशिकोदाहृतमिदम् । तदेतत्त्रयमुपेक्षितं अनीक्षितञ्च दर्पणकृद्भिः ।

अत एव 'होमं पितृक्रियां पश्चात् अनुयागादिकं च यत्' (श्लो ४९६) इत्यपि स्वैरं निराकृतम् । 'घण्टानादसनाथौ द्वौ धूपदीपौ निवेदयेत्, तन्नादसंयुतावेतौ दुष्टघ्नत्व निवर्हणौ। भगवत्प्रीति जनकौ शृण्वतां पापनाशकौ (श्लो. ३५६) इति च बहिष्कृतम्। श्रीमद्गोविन्दगुरुश्चावधीरितः । एम्बारनित्यग्रन्थे घण्टां निनाद्य देवानामागमार्थं च रक्षसाम्। उत्सारणार्थं, भक्तानां सान्निध्याय विशेषतः ॥ इत्यनुगृहीतं निगृहीतं दर्पणे। तच्छिष्यैः भट्टपराशरपादैः क्रियादीपे–'आवाहने धूपदीपे घण्टां मोज्ये निनादयेत्। (श्लो. ३५) इति यदुदितं तदरण्यरुदितं कृतम्। भट्टवंश्यैरद्यापि घण्टानादसनाथमेवाराधनं क्रियते। दर्पणेन तस्य तर्पणं स्यादपि ॥

प्रणामः

स्वाचार्याद्यां द्विजोत्तमः। प्रीत्या पृथक् पृथक् शिष्यः प्रणमेदीश्वरावधि [13. पु.] इत्यनेन पूर्वाचार्यान् नमस्तोमैरर्चयेत् भक्तिभावितैः इति क्रियादीपारम्भे भट्टार्योक्तिर्मनागनुस्मियत इव दर्पणकृद्भिः ॥

प्रदक्षिणद्वयं कृत्वा इति नित्यग्रन्थः । पुनःपुनः प्रणम्योत्थायोत्थायेति गद्यम्। आर्तोपच्छन्दनं गद्यमिति गलहस्तितमिदमेकदेशिभिः प्रदक्षिणमेकमेवेति श्रीवैष्णवसमयाचारनिष्कर्षः । प्रदक्षिणद्वयं स्वीकृत्य प्रणामैकत्वानेकत्वयोः पक्षभेदः प्रादर्शि गोविन्दराजीये । अत्र वङ्गीशकारिकाः 'पादुकाग्रये प्रदायाग्रे प्रणम्य च पुनः पुनः' । (श्लो. २२२)

'दत्वा शुभानि पुष्पाणि प्रणम्य च पुनः पुनः ।' (श्लो. ४०५)

'देवपार्श्वमुपागम्य प्रणम्य च पुनः पुनः ।' श्लो. ४५४)

'प्रणम्य दण्डवद्भूमौ भूयो भूयः पुरो हरेः ॥' (श्लो. ४८८) इत्येवम्।

आग्रयणम्

'नवाग्रं ये तु व्रीहीणामदत्वा चापि भुञ्जते ।
अष्टाविंशापराधं तं कल्पयामि वसुन्धरे' ॥ इति भूमिं प्रति श्रीवराहः ॥

मुमुक्षुभिरादृतम्। नैमित्तिकं चाग्रयणं इति प्रपन्नपारिजाते परमगुरवः । आगमप्रामाण्ये शिष्टान् पश्यामः इति प्रस्तुत्य, न चैतदाचरणं निर्मूलमिति युक्तम्, सन्ध्यावन्दन-

अष्टकाचरणादेरपि निर्मूलत्व प्रसङ्गात्' इति अष्टकाद्यनुष्ठातॄणामेव शिष्टत्वं स्पष्टमुक्तम्। महालयस्यापि महालय एवैकदेशिषु दृश्यते। तेष्वेव केचिदाचरन्तीति पश्यामः। यतीन्द्र-माहानसिकसम्प्रदाये न कस्यचिदप्युपपुत्रस्यावकाशः ॥

'इति यतिराजमहानसपरिमलपरिवाहवासितां पिबत।
विबुधपरिषन्निषेव्यां वेदान्तोदयनसम्प्रदायसुधाम् ॥'

श्रीवीरराघवार्येण सदनुष्ठानदर्पणम्। स्थालीपुलाकन्यायेनाशोधीत्थं वार्तिकक्रमात् ॥

इति श्रीमच्छ्रीनिवासमहादेशिक (श्रीमद्गरुडपुरखामिनः) करुणाकटाक्षलब्धोभयवेदान्तार्थस्य, श्रीमधुरान्तक श्रीशेलेच्चम्बाडि श्रीवीरराघवाचार्यस्य कृतिषु सदनुष्ठानदर्पणविशोधनम् संपूर्णम्। श्रीरस्तु ॥